# कम्पिल्लनामानि

## कम्पिल्लःकर्कशश्चन्द्रोरक्ताङ्गोरोचनोऽपिच।

Kampilla is called as karkasa, candra, raktanga and gorocana.

## कम्पिल्लकोविरेचीस्यात्कटूष्णोव्रणनाशनः।
## कफकासार्तिहारीचकृमिहरोलघुः।। (राजनिघण्टु)

Kampillaka is katu in rasa, laghu in guna, usna in veerya, virecaka, cures vrana, kapha, kasa, arti and krmi.

## कम्पिल्लःकफपित्तास्रकृमिगुल्मोदरव्रणान्।
## हन्तिरेचीकटूष्णंचमेहाविषाश्मनुत्।।

Kampilla is katu in rasa, usna in veerya, alleviates kapha and pitta, recaka, cures asra, krmi, gulma, udara, Vrana, meha, visha and  ahsma.

## कम्पिल्लकः सरश्चाग्निदीपकःकटुकःस्मृतः।
## व्रणस्यरोपणश्चोष्णोलघुर्भेदीकफापहः।।
## व्रणगुल्मोदराध्मानकासपित्तप्रमेहहा।
## आनाहञ्चविषञ्चैवमूत्राशमरीरुजापहः।
## कृमिंचरक्तदोषञ्चनाशयेदितिकीर्तितः।
## तच्छाकंशीतलंतिक्तंवातलंग्राहिदीपनम्।।

Kampillaka is katu in rasa, laghu, sara in guna, usna in veerya, alleviates kapha and rakta dosha, agni dipaka, vrana ropana, bhedi, cures vrana, gulma, udara, ashmana, kasa, pitta prameha, anaha, visha, mutra asma ruja and krmi.

Its saka is tikta in rasa, grahi in guna, sita in veerya, dipana and increases vata.